# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| | | |
|---|---|---|
| **कक्षा – आचार्यप्रथमवर्षम्** (SEM-1) | **प्रश्नपत्रम् – २** | |
| **विषयः – साहित्यम्** | (CC-4.1.1 New & Old) | **गुणाः – ७०** |
| **दिनाङ्कः –१५/१२/२०१८** | *ग्रन्थः काव्यप्रकाशः १ तः ६ उल्लासाः* | **समयः –०२.०० तः ०५.००** |

**प्रथमान्वितिः**

**प्रश्नः १ निम्नलिखितयोः एकस्य ससन्दर्भं व्याख्यां कुरुत ।** **( ०५ )**

( १ ) *काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।*

*सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥*

( २ ) *ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।*

*पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया ॥*

**प्रश्नः २** *आचार्यमम्मटस्य परिचयं लिखत ।* **( १० )**

*अथवा*

*साहित्यशास्त्रस्य सम्प्रदायान् निरूपयत ।*

**द्वितीयान्वितिः**

**प्रश्नः ३ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** **( ०५ )**

( १ ) *स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा ।*

*वाच्यादयस्तदर्थाः स्युः तात्पर्यार्थोऽपि केषुचित् ॥*

( २ ) *पश्य निश्चलनिष्पन्दा बिसिनीपत्रे राजते बलाका ।*

*निर्मलमरकतभाजनपरिस्थिता शङ्खशुक्तिरिव ॥*

**प्रश्नः ४** *वाच्यादीनाम् अर्थानां व्यञ्जकत्वं निरुपयत ।* **( १० )**

*अथवा*

*''लक्षणा तेन षड्विधा'' सोदाहरणं लिखत ।*

**तृतीयान्वितिः**

**प्रश्नः ५ अधोलिखितयोः एकं ससन्दर्भं व्याख्यायत ।** **( ०५ )**

( १ ) *विप्रलम्भः पञ्चविधः ।*

( २ ) *रसभावतदाभासभावशान्त्यादिरक्रमः ।*

*भिन्नो रसाद्यलङ्कारादलङ्कार्यतया स्थितः ॥*

**प्रश्नः ६** *रसस्वरुपं लिखित्वा रसिवषयकानि चत्वारि मतानि लिखत।* **( १० )**

*अथवा*

*श्रृङ्गाररसः भेदोदाहरणसहितः प्रतिपाद्यः।*

## चतुर्थान्वितिः

**प्रश्नः ७ निम्नलिखितयोः एकं ससन्दर्भं व्याख्यायत। ( ०५ )**

( १ ) *अयं स रशनोत्कर्षी पीनस्तनविमर्दनः।*
*नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः॥*

(२) *शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतम्।*
*गुणप्राधान्यतस्तत्र स्थितश्चित्रार्थशब्दयोः॥*

**प्रश्नः ८** *गुणीभूतव्यङ्ग्यकाव्यं सभेदं निरूपयत।* **( १० )**

*अथवा*

*शब्दार्थचित्रकाव्ये ग्रन्थानुसारं निरूप्येताम्।*

**प्रश्नः ९ अधोलिखितेभ्यः दशप्रश्नाः समाधेयाः। ( १० )**

(१) *वाग्देवतावतारः कः ?*
(२) *मङ्गलाचरणे कस्य स्तुतिः (प्रशंसा) वर्तते ?*
(३) *मम्मटोक्तानि काव्यप्रयोजनानि कति ?*
(४) *''यः कौमारहरः'' इति कस्य उदाहरणम् ?*
(५) *द्वितीयोल्लासस्य नाम किम् ?*
(६) *जातौ एव सङ्केतग्रहणं के कुर्वन्ति ?*
(७) *कुन्ताः प्रविशन्ति इत्यत्र का लक्षणा ?*
(८) *तृतीयोल्लासस्य नाम किम् ?*
(९) *अर्थस्य व्यञ्जकत्वे कस्य सहकारिता भवति ?*
(१०) *लोके यानि कार्याणि तानि काव्ये किम् उच्यते ?*
(११) *भुक्तिवादस्य प्रवर्तकः कः ?*
(१२) *विप्रलभ्मश्रृङ्गारः कतिविधः ?*
(१३) *देवादिविषया रतिः किम् उच्यते ?*
(१४) *गुणीभूतव्यङ्ग्यस्य कति भेदाः सन्ति ?*
(१५) *षष्ठोल्लासस्य प्रतिपाद्यविषयः कः ?*

--००--